# संस्कृतवार्ता:

**दिनाङ्क :-18.10.2024**

**प्रात: - 06:55**

## राष्ट्रपति:

राष्ट्रपति: द्रौपदीमुर्मु: अफ्रीकीदेशानां त्रयाणाम् अन्तर्गतं मलावीदेशस्य यात्राया: द्वितीये दिवसे अद्य मलावी-गणराज्यस्य राष्ट्रपतिना लाजरस-चकवेरा इत्यमुना साकं द्विपक्षीयोपवेशनानि विधास्यति । अद्यैव विभिन्नेषु प्रसङ्गेषु प्रतिनिधिमण्डलस्तरीयानि उपवेशनान्यपि विधास्यन्ति। राष्ट्रपति: राष्ट्रिय-युद्धस्मारकं समाधिस्थलं प्रत्यपि गमिष्यति। अत्रावधौ राष्ट्रपति: ह्य: सायं एकस्मिन् सामुदायिककार्यक्रमे भारतीयप्रवासिभिस्साकं संवादं कृतवती।

## प्रधानमंत्री-अध्यक्षता

प्रधानमंत्री नरेन्द्रमोदी अवदत् यत् राष्ट्रिय जनतान्त्रिक संयुति: राष्ट्रप्रगतिं समेधितुं निर्धनवञ्चित वर्गाणि च सशक्तं निर्मातुं प्रतिबद्धास्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्य: चण्डीगढनगरे राष्ट्रिय-जनतांत्रिक-संयुते: (एन्. डी. ए.) इत्येतस्य मुख्यमन्त्रिणां, तेषां प्रतिनिधिनां च सम्मेलनस्य अध्यक्षता कृता। भाजपादलीय: अध्यक्षः जे. पी. नड्डाः, रक्षामंत्री राजनाथसिंहः, गृहमन्त्री अमितशाहः च अस्यां सभायां भागम् अगृह्णन्। इयं सभा राष्ट्रियविकासविषयेषु केन्द्रिता आसीत्। अस्मिन् संविधान-का-अमृतमहोत्सवस्य आचरणस्य विषये अपि चर्चाः समनुष्ठिता:। सभायां उपस्थितः उत्तराखण्डस्य मुख्यमन्त्री पुष्कर् सिंह धामी इत्येषः प्रसारमाध्यमेन सह वार्तालापं कुर्वन् उक्तवान् यत् अस्मिन् अवसरे विकसितभारतस्य संकल्पं साधयितुं विभिन्नेषु विषयेषु प्रधानमन्त्रिण: मार्गदर्शनं प्राप्तवन्तः इति।

## विधानसभा निर्वाचनम्

झारखण्ड विधानसभा निर्वाचनस्य प्रथम-चरणीय मतदानाय अधिसूचना अद्य प्रसारयिष्यते। अस्मिन् चरणे त्रिचत्वारिंशत् नैर्वाचनिक क्षेत्रेषु मतदानानि भविष्यन्ति। नामाङ्कनपत्राणि अस्य मासस्य पञ्चविंशति दिनाङ्कं यावत् पूरयितुं शक्यन्ते। तदनु अष्टाविंशति दिनाङ्के अनुसन्धेयकार्यं नामाङ्कन पत्राणां भविष्यति। तावत् प्रत्याशिन: अस्य मासस्य त्रिंशद्दिनाङ्के नामाङ्कन प्रत्यावर्तनं कर्तुं शक्नुवन्ति। प्रथमचरणस्य मतदानं नवम्बरमासस्य त्रयोदश दिनाङ्के द्वितीयचरणस्य च विंशतिदिनाङ्के भविष्यति इति। तत्रैव मतगणना नवम्बरमासस्यैव त्रयोविंशति दिनाङ्के निर्धारितास्ति।

## विदेशराज्यमन्त्री

विदेशराज्यमन्त्री पबित्रा-मार्गेरिटा इत्येष: शनि-रविवासरयो: इण्डोनेशियादेशं प्रति यास्यति। असौ तत्र रविवासरे जकार्तायां राष्ट्रपते: प्रबोवो-सुबियान्तो इत्यस्य उपराष्ट्रपते: जिब्रान-राकाबुमिंक राका इत्येतस्यापि शपथग्रहणसमारोहे सम्मिलितो भविष्यति। उभयो: देशयो: राजनयिकसम्बन्धानां पञ्चसप्ततिवर्षाणि अस्मिन्नेव वर्षे सम्पूरितानि भवन्ति। तावत् इयं यात्रा महत्वपूर्णा अस्तीति।

## केन्द्रीयप्रत्यक्षकरमण्डलम्

केन्द्रीयप्रत्यक्षकरमण्डलेन आयकर  अधिनियमस्य अन्तर्गतं अपराधानां शमनाय संशोधितमार्गदर्शिकाः प्रसारिता: । एता:  संशोधित मार्गदर्शिकाः अस्मिन् विषये विद्यमाना: सर्वविध: मार्गदर्शिका: अतिक्रम्य निर्गम-दिनाङ्कात् प्रलंबितानां नूतनानां च आवेदनानां कृते प्रवर्तन्ते। मार्गदर्शिकाः विद्यमान-बहुविध-मार्गदर्शकानां काठिन्यं न्यूनीकृत्य, संयोजन-प्रक्रियायाः सरलीकरणं कृत्वा, संयोजन-शुल्कं न्यूनीकृत्य च हितधारकेभ्यः साहाय्यं कुर्वन्ति।

## क्रिकेटस्पर्धायां

क्रिकेटप्रतिस्पर्धायां भारत-न्यूजीलैण्ड-देशयोर्मध्ये प्रथमनिकषस्पर्धाया: तृतीयं दिनमद्य प्रात: बेङ्गलुरूनगरस्य एम्. चिन्नास्वामि-क्रीडाङ्गणे पुन: समारप्स्यते।